25/10/2020

मुख्यवार्ताः

- **प्रधानमन्त्रिणा मोदिना व्याहृतं यत् – प्रत्येकग्रामाय उचितस्वास्थ्यसौविध्यं सुलभायितुं प्रयासाः विधीयन्ते ।**
- **प्रशासनेन व्यक्तिगतकरदातृभ्यः आयकरप्रपूरणाय तिथिः सितम्बरमासस्य समयसीमा दिसम्बरमासस्य एकत्रिंशत् दिनाङ्कं यावत् विवर्धितः ।**
- **देशे कोविड नाइन्टीन् इति वैश्विकसङ्क्रमणप्रकरणे सुखास्पदं वृत्तम् । देशे प्रायः सप्ततिलक्षाधिकाः जनाः स्वस्थीभूताः । स्वास्थ्यलाभे प्रतिशतं नवतिप्रतिशतमितप्रायः परिष्कारः ।**
- **प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः एकादशवादने आकाशवाण्या स्वीये मन की बात इति कार्यक्रमे देशवासिभिः साकं स्वीयविचारान् प्रस्तोष्यति इति ।**
- **IPL स्पर्धामालायां ह्य कोलकाता नाइट राइडर्स इत्येतत् दलेन दिल्ली कैपिटल्स इत्येतत् दलं ऊनषष्टि-धावनाङ्कैः, अपरतः किंग्स इलेवन पञ्जाब इत्येतत् दलेन सनराइजर्स हैदराबाददलं द्वादशाङ्कैः पराभूतम् ।**

अथ विशदीकृताः वार्ताः

1. **प्रधानमन्त्री नरेन्द्रमोदी ह्यः गुजरातराज्ये दृश्यश्रव्यपरान्तर्जालीय माध्यमेन त्रिस्रः महत्त्वपूर्णयोजनाः समारभत । प्रधानमन्त्रिणा मोदिना गिर-सोमनाथ, पाटन दाहोद चेति जनपदानां कृषकेभ्यो किसान सूर्योदय योजनासमारब्धा । यस्यान्तर्गतं कृषकेभ्यः दिवसकाले विद्युत् प्राप्स्यते इति । प्रधानमन्त्रिणा जूनागढे गिरनार पर्वतीय रोपवे इत्यस्यापि उद्घाटनं विहितम् । प्रधानमन्तिणा मोदिना व्याहृतं यत् अनेन हि कृषकाणां जीवने हर्षोल्लासः समागमिष्यति । प्रधानमन्त्रिणा मोदिना अहमदाबादे यूएनमेहताहृदयरोगविज्ञाना-नुसंधान केन्द्रंइति देशस्य बृहत्तमो- हृदय रोग चिकित्सालयो राष्ट्रायसमर्पितः । अत्र हि आधुनिकसुविधाः सुलभायिताः सन्ति इति । श्री मोदी अवोचत् यत् समुचित-स्वास्थ्य सैविध्येन सह प्रत्येको ग्रामः योज्यते इति । प्रधानमन्त्रिणा अवादि यत् आयुष्मान भारतम् इत्यनया योजनया गुजरातस्यएकविंशतिर्लक्षजनाः उपचर्यन्ते इति । अत्रान्तरे प्रधानमन्त्री मोदी विश्वस्य बृहत्तमस्य मन्दिर रोपवे परियोजनां प्रापभत । प्रधानमन्त्रिणा तत्रत्य जनाः मुखनासिकाच्छादकं स्थापयितुं, सामाजिकदौर्यानुपालानाय च प्रार्थिताः इति ।**

2. प्रशासनेन ऊनविंशत्यधिक-विंशत्यधिक-द्विसहस्रतमाब्दीकाय वर्षाय आयकर-प्रपूरणाय अन्तिमतिथिः नवम्बर मासस्य त्रिंशत दिनाङ्कात् दिसम्बर मासस्य एकत्रिंशत् दिनाङ्कं यावत् विवर्धितः । वित्तमन्त्रालय द्वारा एकस्मिन् वक्तव्ये प्रोदितं यत् येभ्यः करदातृणां लेखापरीक्षणं वर्तते आवश्यकं तेभ्यः आयकर-प्रपूरणाय अन्तिमः तिथिः नवम्बर मासस्य त्रिंशत् दिनाङ्काद् आगानि वर्षस्य जनवरी मासस्य एकत्रिंशत दिवसं यावत् विवर्धितः । अन्ताराष्ट्रिय-आयकरदातृभ्यः राष्ट्रिय-आयकरदातृभ्यश्च आयकरप्रपूरणाय तिथिः नवम्बर मासस्य त्रिंशत् दिनाङ्काद् आगानि वर्षस्य जनवरी मासस्य एकत्रिंशत दिवसं यावत् समेधितः ।

3. स्वास्थ्य मन्त्रालयानुसारं देशे कोरोना इति वैश्विकसङ्क्रमणात् प्रायः सप्ततिलक्षाधिकाः जनाः पूर्णतया स्वस्थीभूताः । गत चतुर्विंशति होरासु सप्तषष्ट्यधिकाः जनाः इदं वैश्वविकसङ्क्रमणं पराभूतवन्तः । देशे कोरोना विभीषिकातः स्वस्थ्यलाभप्राप्तवतां जनानां प्रतिशतं प्राय नवतिमतं वर्तते । साम्प्रतं यावत् देशे अशीति-सहस्राधिक-षड्लक्ष-सक्रियप्रकरणानि वर्तन्ते इति । गत चतुर्विंशति होरासु सप्तत्यधिक-त्रिशतोत्तर-त्रिपञ्चाशत सहस्राधिकाः जनाः सङ्क्रान्ताः सूच्यन्ते इति । आहत्य देशे अष्ट सप्तति लक्षाधिकाः जनाः कोरोना इति वैश्विक सङ्क्रमणेन सङ्क्रान्ताः सूचन्ते इति । गत चतुर्विंशति होरायां सार्ध षड्शतं जनाः प्राणैर्वियुक्ताः जाताः । अपि च त्रयोदश लक्षाधिकानि परीक्षणानि समुष्ठितानि सन्ति इति ।

4. प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः एकादशवादने आकाशवाण्या स्वीये मन की बात इति कार्यक्रमे स्वीयविचारान् प्रस्तोष्यति इति । अवधेयास्पदं वर्तते यत् अयं हि प्रधानमन्त्रिणो मन की बात इति कार्यक्रमस्य सप्ततितमं संस्करणं विद्यते । कार्यक्रमोऽयम् आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः प्रस्तोष्यते इति । इदं प्रसारणं newsonair.com , newsonair इति दूरभाष-चरिष्णुतन्त्रमाध्यमाभ्यामपि अवलोकयितुं शक्यते । सममेव आकाशवाणी, डी.डी.न्यूज़, प्रधानमन्त्री कार्यालयः, सूचनाप्रसारणमन्त्रालयः इत्येतेषां यूट्यूब वाहिनीष्वपि अस्य कार्यक्रमस्य साक्षात्प्रसारणं विधास्यते । अवधेयस्पदं वर्तते यत् कार्यक्रमोऽयं रात्रि अष्टवादने क्षेत्रीयभाषास्वपि प्रसार्यते इति ।

5. IPL स्पर्धामालायाम् अद्य क्रीडा द्वयम् स्पर्धिष्यते इति । प्रथमा क्रीडा दुबइयाम् अपराह्ने सार्धत्रिवादनात् रॉयल चैलैन्जर्स बैङ्गलूरु इत्येतत् दलं चैन्नई सुपरकिंग्स दलं च अन्तरा स्पर्धिष्यते । अपरतः द्वितीया क्रीडा सायं सार्धसप्तवादनात् राजस्थान

रॉयल्स् दलं मुम्बई इण्डियंस् इत्येत दलं च अन्तरा शाहजहां क्रीडाङ्गणे भविष्यति । ह्यः क्रीडितायां प्रथमास्पर्धायां कोलकाता नाइट राइडर्स इत्येतत् दलेन दिल्ली कैपिटल्स इत्येतत् दलं ऊनषष्टि-धावनाङ्कैः, अपरतः द्वितीयायां क्रीडायां किंग्स इलेवन पञ्जाब इत्येतत् दलेन सनराइजर्स हैदराबाददलं द्वादश-धावनाङ्कैः पराभूतम्

मुख्यवार्ताः

- प्रधानमन्त्रिणा मोदिना व्याहृतं यत् – प्रत्येकग्रामाय उचितस्वास्थ्यसौविध्यं सुलभायितुं प्रयासाः विधीयन्ते ।
- प्रशासनेन व्यक्तिगतकरदातृभ्यः आयकरप्रपूरणाय तिथिः सितम्बरमासस्य समयसीमा दिसम्बरमासस्य एकत्रिंशत् दिनाङ्कं यावत् विवर्धितः ।
- देशे कोविड नाइन्टीन् इति वैश्विकसङ्क्रमणप्रकरणे सुखास्पदं वृत्तम् । देशे प्रायः सप्ततिलक्षाधिकाः जनाः स्वस्थीभूताः । स्वास्थ्यलाभे प्रतिशतं नवतिप्रतिशतमितप्रायः परिष्कारः ।
- प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः एकादशवादने आकाशवाण्या स्वीये मन की बात इति कार्यक्रमे देशवासिभिः साकं स्वीयविचारान् प्रस्तोष्यति इति ।
- IPL स्पर्धामालायां ह्य कोलकाता नाइट राइडर्स इत्येतत् दलेन दिल्ली कैपिटल्स इत्येतत् दलं ऊनषष्टि-धावनाङ्कैः, अपरतः किंग्स इलेवन पञ्जाब इत्येतत् दलेन सनराइजर्स हैदराबाददलं द्वादशाङ्कैः पराभूतम् ।